सूर्य्यग्रहैः समा। शुभयोगसमायुक्ता शनौ शतभिषा यदि। महामहेति विख्याता त्रिकोटिकुलमुद्धरेत्” “अत्र संज्ञाविधेः सार्थकत्वाय निमित्तत्वेन मासपक्षतिथ्युल्लेखानन्तरं महावारुणीमहामहावारुण्याद्युल्लेखनीये श्राद्धे पार्व्वणादिसंज्ञोल्लेखवत् पौर्णमास्यमावास्ययोः पक्षोल्लेखश्च ति॰त॰। अत्र वारघटितत्वात् सावनदिनमेव ग्राह्यम् “सूतकानां परिच्छेदो दिनमासाब्दपास्तथा। मध्यमग्रहभुक्तिश्च सावनेन प्रकीर्त्तितः” सू॰सि॰ उक्तेः। कौर्म्मपाद्मयोः “द्वौ तिथ्यन्तावेकवारे यत्र स्यात् स दिनक्षयः”। वशिष्ठः “एकस्मिन् सावने त्वह्नि तिथीनां त्रितयं यदा। तदा दिनक्षयः प्रोक्तस्तत्र साहस्रिकं फलम्” इत्येतयोर्वचनयोरेकवाक्यतयापि तथावगम्यते। रेखापूर्व्वपरयोरित्यादिकन्तु ज्योतिःशास्त्रोक्तं कालहोरादिज्ञानार्थमिति। अत्र “संक्रान्तिषु व्यतीपाते ग्रहणे चन्द्रसूर्य्ययोः। पुष्ये स्नात्वा च गङ्गायां कुलकोटीः समुद्धरेत्”। इति ब्रह्माण्डपुराणात् ग्रहणमात्रे त्रिकोटिकुलोद्धरणविधानात् ततोऽधिकेषु वारुण्यादिषूत्तरोत्तरगुरुषु महामहावारुण्यादिषु यत् त्रिकोटिकुलोद्धरणमुक्तं तदुद्धरणगततारतम्येनाविरुद्धम् “यं यं क्रतुमधीते च तस्य तस्याप्नुयात् फलम्” याज्ञवल्क्योक्ताध्ययनात् यथा तत्तद्यागकरणेऽधिकफलम् अतएव शिष्टानामादरोऽपि तथेति। नचात्र “स्नानं कुर्व्वन्ति यानार्य्यश्चन्द्रे शतभिषं गते। सप्तजन्म भवेयुस्ता दुर्भगा विधवाध्रुवम्”। “त्रयोदश्यां तृतीयायां दशम्याञ्च विशेषतः। शूद्रविट्क्षत्रियाः स्नानं नाचरेयुः कथञ्चन” इति प्रचेतोजाबालिवचनाभ्यां स्त्रीणां शूद्रादीनाञ्च स्नाननिषेध इति वाच्यम् “भोगाय क्रियते यत्तु स्नानं यादृच्छिकं नरैः। तन्निषिद्धं दशम्यादौ नित्ये नैमित्तिके न तु” इति हेमाद्रिधृतवचनेन रागप्राप्तस्नान एव निषेधात् नक्षत्रेऽपि तथाकल्पनात्। अत्र त्रयोदश्यां पूर्णायां पूर्व्वाह्णेतरकाले नक्षत्रादिसत्त्वे परदिने पूर्व्वाह्णे तिथिनक्षत्रलाभेऽपि पूर्व्वदिन एव स्नानम्। तथा च कालमाधवीये नारदीयम् “आदित्योदयवेलाया आरभ्य षष्टिनाडिकाः। तिथिस्तु सा हि शुद्धा स्यात् सार्व्वतिथ्यो ह्ययं विधिः” अत्र पूर्व्वतिथेः शुद्धत्वाभिधानात् तत्परतिथेरशुद्धत्वाभिधानं प्रतीयते। रात्रावपि वारुण्यादिषु गङ्गायां स्नानम्। “दिवा रात्रौ च सन्ध्यायां गङ्गायाञ्च प्रसङ्गतः। स्नात्वाऽश्वमेधजं पुण्यं गृहेऽप्युद्धृततज्जलैः”। कृत्यरत्नाकरे देवलः “महानिशा तु विज्ञेया मध्यमं प्रहरद्वयम्। तस्यां स्नानं न कर्त्तव्यं काम्यनैमित्तिकादृते”। अत्र महानिशायामपि काम्यनैमित्तिकं स्नानं प्रतीयते”। ति॰त॰रघु॰

**वारेन्द्री** स्त्री देशभेदे (वारेन्द्रभूमि) (राजसाही) वङ्गदेशप्रदेशभेदे।

**वार्च्च** त्रि॰ वारि चरति चर—ड। जलचरे हंसादौ।

**वार्णिक** पु॰ वर्णस्योल्लेखनं शिल्पमस्य ठञ्। लेखके शब्दच॰

**वार्त्त** न॰ वृत्ति+अण्। १आरोग्ये २असारे ३निरामये ४वृत्तिशीले च त्रि॰ अमरः। ५दुर्गायां “पश्वादिपालनाद्देवी कृषिकर्म्मान्तकारणात्। वर्त्तनाद्धारणाद्वापि वार्त्ता सैव प्रगीयते” देवीपु॰। ६वृत्तौ कृषिकर्म्मणि ७जनश्रुतौ अमरः। ८वृत्तान्ते ९वातिङ्गणे मेदि॰। १० कालकर्त्तृके भूतनाशने च स्त्री “अस्मिन् महामोहमये कटाहे सूर्य्याग्निना रात्रिदिनेन्धनेन। मासर्त्तुदर्व्वीपरिघट्टनेन भूतानि कालः पचतीति वार्त्ता” इति भा॰व॰ यक्षप्रश्नः।

**वार्त्ताक** पु॰ वार्त्तमारोग्यमाकयति गमयति अक—अच्—अण्। वार्त्ताकी त्रिका॰। भावप्र॰ स्त्रीत्वमप्युक्तं ङीप्

**वार्त्ताकु** स्त्री वार्त्तमारोग्यमाकयति गमयति अक—णिच्—उण्। वृन्ताके (वेगुन) शब्दच॰। “अग्निप्रदा१ मारुतनाशिनी२ च शुक्रप्रदा३ शोणितवर्द्धिनी४ च। हृत्कासकण्ठारुचिनाशिनी च ५।६।७। वार्त्ताकुरेषा गुणसप्रयुक्ता। सा बाला कफवातघ्नी पक्वा सक्षारपित्तला। सदाफला त्रिदोषघ्नी रक्तपित्तप्रसादनी। अङ्गारपक्वा वार्त्ताकुः किञ्चित् पित्तकरी मता। कफमेदोऽनिलहरा खरा लघुतरा परा” राजनि॰। “वृन्ताकं स्वादु तीक्ष्णोष्णं कटुपाकमपित्तलम्। ज्वरवातबलासघ्नं दीपनं शुक्रलं लघु। तद्बालं कफपित्तघ्नं वृद्धं पित्तकरं गुरु। वृन्ताकं पित्तलं किञ्चिदङ्गारपरिपाचितम्। कफमेदोऽनिलामघ्नमत्यन्तं लघु दीपनम्। तदेव हि गुरु स्निग्धं सतैलं लवणान्वितम्। अपरं श्वेतवृन्ताकं कुक्कुटाण्डसमं भवेत्। तदर्शःसु विशेषेण हितं हीनञ्च पूर्व्वतः” भावप्र॰। तत्रार्थे पु॰ त्रिका॰।

**वार्त्तायन** पु॰ वार्त्ताया अयनं येन। प्रवृत्तिज्ञे चरे हेमच॰

**वार्त्तावह** पु॰ वार्त्तामावहति आ+वह—अण्। १कृषिवाणिज्याजीविनि वणिग्भेदे अमरः २वृत्तान्तवाहके त्रि॰

**वार्त्तिक** न॰ वृत्तिरूपेण कृतो ग्रन्थः ठक्। “उक्तानुक्त-